ल्लोकतत्त्वविवित्सया वृतोमात्यैःकतिपयैःप्रह्लादोभगवत्प्रियः ॥१३॥ कर्मणाकृतिभिर्वा-
चालिंगैर्वर्णाश्रमादिभिः ॥ नविदंतिजनायंवैसोसावितिनवेतिच ॥१४॥ तंनत्वाभ्यर्च्यविधिव-
त्पादयोःशिरसास्पृशन् विवित्सुरिदमप्राक्षीन्महाभागवतोसुरः ॥१५॥ बिभर्षिकायंपीवा-
नंसोद्यमोभगवान्यथा ॥ वित्तंचैवोद्यमवतांभोगोवित्तवतामिह ॥१६॥ भोगिनांखलुदेहोयं
पीवाभवतिनान्यथा ॥१७॥ नतेशयानस्यनिरुद्यमस्यब्रह्मन्नुहार्थोयतएवभोगः ॥ अभो-
गिनोयंतवविप्रदेहःपीवायतस्तद्वदनःक्षमंचेत् ॥१८॥

रजोभिर्धूसरैः ॥ तनूदेशैर्देहावयवैर्निगूढममलंतेजोयस्यतम् ॥१२॥ कर्मादिभिर्जनायंनविदुःतं
पादयोःशिरसास्पृशन् नत्वाअभ्यर्च्यअप्राक्षीदित्युत्तरेणान्वयः ॥१४॥१५॥ उद्यमसहितइवभोगवान्-
निवपीवानंस्थूलंदेहंधारयसि तत्रहेतुंवदेतितृतीयेनान्वयः ॥१६॥ उद्यमंविनैवमसंभोगोस्तीति
चेत्तत्राह वित्तंचेति इतिनिश्चयेह इतिप्रसिद्धोनवार्थोनास्तीतिप्रसिद्धमेवेत्यर्थः यतोर्थाद-
वयतोहेतोःपीवातन्मह्यंवदेत् ॥१८॥

राम॰
५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंच विद्याजेनाय समर्थोप्यये जनन्दर्थमु[illegible]यमं करोति ॥ त्वं तु समर्थोपि किमिति न करोषीत्याह कविर्वि
द्वान् कल्पोदक्षः ॥ निपुणदृक् च ब्रह्मः विद्याप्रियाः लोकरंजनाकथायस्य तथापि लोकस्य कर्मकुर्वतः संतः
शोचते न द्वीदितिनापिवा ॥ तत्सर्वं प्रपंचयन्नपि पापोतनेन द्वेषितत्व कर्मनवेदितो यो विवानवाप्नोषीत्यर्थः ॥ १८ ॥
२ तस्य वामौ वासु तेन नयविनो वशीकृतः सन् ॥ १९ ॥ अथात्मवत्तथा अनंदस्या भवान् वेदत्राया ज्ञानिनां स नार
मू मतो न तु भुवांदमिति ॥ यदुक्तं तदेवाह ॥ नरनारीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानीत्य
मू र्थः ॥ २० ॥ वेदंतत्त्वरहस्यं ॥ यस्मे निवृत्ति प्रवृत्तिः सन् अज्ञानं धुनोति ॥ अर्को यथा बहिर्ध्वां[illegible]तं ॥ २१ ॥ यथाकृत

कविः कल्पो निपुणदृक् विच्च प्रियकथः समः ॥ लोकस्य कुर्वतः कर्म शोचते द्वितिनापिवा ॥ १९ नद्वेषितो विवा २
नारद उवाच ॥ स त्वयद्देवपतिनापरिष्टो महामुनिः स यमाजसत्तमण्याह तद्वां सत्यं यथा वि
तः ॥ १९ ब्राह्मण उवाच ॥ वेदेदमस्तत्त्वश्रेष्ठ भवान्तु न्यायसंमतः ईदृशोपरमयोर्नृणां पदान्यध्यात्म
चक्षुषा ॥ २० ॥ यस्मै नारायणाद्देवो भगवान् हृदि तः सदा ॥ भक्त्या केवलयाज्ञानं धुनोति ध्वांत
नमर्कवत् ॥ २१ ॥ अथापि ब्रूमहे प्रश्नांस्तव राजन्यथाश्रुतं ॥ संभाषणीयो हि भवानात्मनः
शुद्धिमिच्छता ॥ २२ ॥ तृष्णया भववाहिन्या योग्यैः कामैरपूर्यया ॥ कर्माणि कार्यमाणोहं नानायोनि
षु योजितः ॥ २३ ॥ यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन् ॥ स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च २४

मिन्योहत्वपतिहारायोजितं ॥ २२ ॥ लोकः कर्मसु प्रवर्तते त्वं तु तूष्णीं[illegible]तः सन् ॥ किं शोचति यदुक्तं तत्राह तृष
येति त्रिभिः ॥ भवप्रवाहकारण्या योग्यैरपि विषयैः ॥ पूरयितुमशक्यया तत्संकर्मसु ॥ प्रवर्त्यमा या२
नोहं एवं नानायोनिषु योजितः प्रवेशितः ॥ २३ ॥ तयैवेमं लोकं मनुष्यलोकं यदृच्छया प्रापितः ॥ कथंभूत
लोकं धर्मेण स्वर्गस्य द्वारं अथ मर्मणा तिरश्चां नरकादियोनि[illegible] द्वारं मिश्राभ्यां पुनरस्य मनुष्य[illegible]स्य
तुनाभ्यां
द्वारं सर्वनोनिवृत्त्या अपवर्गस्य द्वारमित्यर्थः ॥ २४ ॥ नि४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग० स्की० ५८

अत्रापि मनुष्यत्वेपि अन्यापन्नत्रये दुःखनिहन्मैवविपर्ययं दृष्टानि हतोस्मि ॥२५॥ अथ यदि कदाचित्सुखं
स्यादपि निहत्य त्वैकिं स्यादि[illegible]तिचेत्तत्राह ॥ सुखमस्यजीवस्य स्वरूपमेव ॥ तर्हि किं न प्रकाशते तत्राह
सर्वेंति नवनीतीति तत्तु ॥ सर्वक्रियानिहृत्तोस्त्वतएव प्रकाशतइत्यर्थः ॥ भोगांश्च मनःसंस्पर्शजान् मनो
रथमात्रजान् ॥ अप्राप्य ॥ नान्दहृष्टास्वपश्यामि निहृष्यमोस्मीत्यर्थः ॥ तर्हि कदाचित्कथं भुंदेतत्राह संवि
शान ॥ प्रारब्धभोगान्भुंजनि त्यर्थः ॥ २६ ॥ एवं चेत्तर्हि कोपि संसारं प्राप्नुयात्तत्राह ॥ इत्येतदात्मनः सुखात्म
करूपं स्वार्थं स्वस्मिन्नेव संतं पुरुषार्थं विस्मृत्य अस्त्यपि हृदिते ॥ २७ ॥ एतदेव सहृष्टांतेन स्पष्टयति जलमि

अत्रापिदं पतीनोच सुखंचाप्या[illegible] पन्नत्रये ॥ कर्माणि कृत्वतां दृष्टानि हतोस्मि विपर्ययं ॥ २५ ॥
सुखमस्यात्मनोरूपं सर्वेहोपरतिस्तत्तुः ॥ मनःस्पर्शजान्दृष्टा भोगान्स्पश्यामि संविशान् ॥ २६ ॥ सं
इत्येतदात्मनः स्वार्थं संतं विस्मृत्य वे पुमान ॥ विचित्रामसृतिं हंते येरात्मा प्नोति संसृतिं ॥ २७ ॥
जलं तृणहृदं वैष्टिं त्र हित्वा तोजलकाम्यया ॥ मृगतृष्णामुपाधाव यथान्यत्रार्थदृक्स्वतः ॥ २८ ॥
देहादिभिर्दैवतं त्रैरात्मनः सुखमीहतः ॥ दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः ॥
आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् ॥ मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किं ॥ ३० ॥
पश्याक्षिथिनिनां क्लेशलब्धानामजितात्मनो ॥ भयादलब्धनिद्राणां सर्वतोभिविशंकिनां ॥ ३१ ॥

तिनडुहृवैः ॥ तृणशैवलादिभिर्वृतं जलकाम्ययाजले[illegible]च्छयास्वतः ॥ आत्मस्वरूपादन्यत्र पुरुषार्थं पश्य
न् ॥ २८ ॥ एवं स्वस्य निरूप्य मत्वे कारणमुक्ताविपर्ययं दृष्ट्वा नियतुक्तः ॥ न हि हृणानि देहादिभिरितिपंच
भिः ॥ इत्यतः ॥ अनीशस्य निर्देवस्य पुनः शास्त्रा ॥ क्रियामोघा विफलाएव भवंति ॥ २९ ॥ क्रियाणां सफ
लत्वेपि [illegible] फलस्यानुपयो[illegible]गमाह ॥ आध्यात्मिकादिभिरिति ॥ मर्त्यस्य मरिष्यतः कृच्छ्रेणदुः
खेनोपनतैः प्राप्तैः ॥ ३० ॥ कृच्छ्रेति नैव प्राप्तैरप्यर्थैर्दुःखं तदवस्थमित्याह ॥ पश्यामीति ॥ ३१ ॥ ॥ ॥

ईकृतः २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भयंप्रपंचयतिराजत इतिस्वस्मात्तत्रपवकथंचित्रागभोगाविस्मरणादिनानाशः स्यादितिप्राणवनाम
ध्यवनांचभयंनित्यं॥ ३४॥ अतोऽनर्थहेतुत्वात्प्राणार्थेस्पृहानकार्येत्याह शोकेति॥ ३५॥ नन्वेवमनर्थः
मनुभवनापिनकेचिद्विरज्यंतेनचयथालाभेनतुष्यंति॥ तेतुकथंवैराग्यादिकंप्राप्नोसितत्राह मधुकरेति
तिमधुमक्षिकाजगासोपयोःशिक्षयाहत्रपर्यालोचनया॥ ३६॥ मधुकराच्छिक्षितमाह विरागइतिविज्ञ

राजतस्त्रौरतःशत्रोःस्वजनात्पशुपतिना॥ अर्थिभिःकालतःस्वस्माद्वित्तिंप्राणार्थेबहुधंयं ३४
शोकमोहभयक्रोधरागाद्वैव्यश्रमादयः॥ यन्मूलाःस्युर्नृणांजह्यात्स्पृहांप्राणार्थयोर्बुधः ३५
मधुकारमहासर्पौलोकेस्मिन्नोगुरूत्तमौ॥ वैराग्यंपरितोषंचप्राप्तायच्छिक्षयावयं॥ ३६॥ विरा
गःसर्वकामेभ्यःशिक्षितोमेमधुव्रतात्॥ कृच्छ्राप्तंमधुवद्वित्तंहत्वाप्यन्योहरेत्पतिं॥ ३७॥ अ
नीहःपरितुष्टात्मायदृच्छोपनतादहं॥ नोचेच्छयेबव्हहानिमहाहिरिवसत्ववान्॥ ३८॥ क्वचि
दल्पंक्वचिद्भूरिःभुंजेन्नंस्वाद्वस्वादुवा॥ क्वचिद्भूरिगुणोपेतंगुणहीनमुतक्वचित॥ ३९॥ श्रद्धयोप
हृतंक्वापिकदाचिन्मानवर्जितं॥ भुंजेभुक्त्वाथकस्मिंश्चिद्दिवानक्तंयदृच्छया॥ ४०॥ क्षौमंदु
कूलमजिनंचीरवल्कलमेववा॥ वसेन्यदपिसंप्राप्तंदिष्टभुक्ततुष्टधीरहं॥ ४१॥ क्वचिच्छयेथ
रोपस्थेतृणपर्णाश्मभस्मसु॥ क्वचित्प्रासादपर्यंकेकशिपौवापरेच्छया॥ ४२॥ क्वचित्स्नातो
लिप्तांगःसुवासःस्रग्व्यलंकृतः॥ रथेभाश्वैश्चरेक्वापिदिग्वासाग्रहवद्विभो॥ ४३॥॥

व्य. १

एवंहर्षप्यन्योदितंहरेदित्येवं॥ ३७॥ अजगराच्छिक्षितमाह अनीहइतिः सत्ववान् धैर्यवान्॥ ३८॥ पीनत्वे
पतितंहर्षप्यन्योदितंहरेदित्येवं ... प्रपंचयति क्वचिदस्मानितिषड्भिः॥ ३९॥ चीरंजीर्णवस्त्रखंडंवसे
दूत्वायेन ~ यदृच्छयाप्राप्तंस्तरितेषुंप्रपंचयति क्वचिदस्मानितिषड्भिः॥ ३९॥ चीरंजीर्णवस्त्रखंडंवसे
परिदधामिदिष्टभुक्प्रारब्धभोगी॥ ४१॥ प्रासादमध्यपर्यंकेनचापिकशिपौ॥ ४२॥ चरेविचरामिक्वचिद्ग्र
हवद्दिगंबरोविचरामि॥ ४३॥ ॥ राम ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० स० टी० ५

नश्यमानायमानकर्तृत्वममवैषम्यमित्याह ॥ नाहंनिंदामिमहात्मनिविस्रौ ॥ ४२ ॥ एवंभूतत्वेनस्थितावया
यमाह ॥ विकल्पमिति भ्यांविहीनोभेदग्राह्य कमनोवृत्तौ अर्थरूपोविभ्रमोयस्मिन्वैविके अहंकारेअप्तु
अनंतनरंमह्य नव्यहारेणेत्यर्थः ॥ ४३ ॥ सत्यमे प्रपृच्छतीतितथा ॥ ४४ ॥ मंदंहृत्पालोकशास्त्राभ्यांयमपेतेनतु
नवदृष्टायतोभवान् भगवत्परः ॥ ४५ ॥ इतिश्रीभावार्थेसप्तमेत्रयोदशः ॥ १३ ॥ चतुर्दशेगृहस्थस्यप

नाहंनिंदेनचस्तौमिस्वभावविषमंजनं ॥ एतेषांश्रेयआशासेउतैकात्म्यंमहात्मनि ॥ ४२ ॥
विकल्पंजुहुयाच्चित्तौतांमनस्यर्थविभ्रमे ॥ मनोवैकारिकेहुत्वातंमायायांजुहोत्यनु ॥ ४३ ॥
आत्मानुभूतौतांमायांजुहुयात्सत्यदृङ्मुनिः ततोनिरीहोविरमेत्स्वानुभूत्यात्मनिस्थितः ॥
स्वात्मवृत्तंममेदंतेसुगुप्तमपिवर्णितं ॥ व्यपेतंलोकशास्त्राभ्यांभवान्हिभगवत्प्रियः ॥ ४५ ॥
पूजयित्वाततःप्रीतआमंत्र्यप्रययोगृ
नारदउवाच ॥ धर्मंपरमहंस्यंवैमुनेःश्रुत्वासुरेश्वरः ॥ युधिष्ठिरउवाच ॥ गृहस्थएतांप
हं ॥ ४६ ॥ इतिश्रीभागवतेसप्तमस्कंधेत्रयोदशोध्यायः ॥ १३ ॥ श्रीनारदउवाच ॥ सा
दवींविधिनायेनयांजसा ॥ याया देवऋषेब्रूहिमादृशांगृहमूढधीः ॥ १ ॥ श्रीनारदउवाच ॥ सा
क्षाद्वासुदेवार्पणं ... ॥ विष्णु
धुष्वेमहाभागलोकानामनुदृष्टाता ॥ तेनसंगाश्चनकैः संगमात्मजायात्मजादिषु ॥ विमु
च्यमानेषुस्वयंस्वप्नवदुत्थितः ॥ ५ ॥ नतेष्वनदृष्टवसंत्रेष्ठुमयेनकर्मिणा ॥ २ ॥ गृहेषु
वस्थितोराजन्क्रियाःकुर्वन्गृहोचिताः ॥ वासुदेवार्पणंसाक्षादुपासीनमहामुनीन् ॥ ३ ॥ शृ
ण्वन्भगवतोभीक्ष्णमवतारकथामृतं ॥ श्रद्धयानोयथाकालमुपशांतजनावृतः ॥ ४ ॥
एवंभगवतोभीक्ष्णमवतारकथामृतं ॥ श्रद्धयानोयथाकालमुपशांतजनावृतः ॥ ४ ॥ गृहस्थस्यमुक्तोपायमाह ॥ तत्रप्रश्नं श्रुत्वेनगत्वेनप्र
श्नमाथमेर्ज्यंनेहेशाकालादिभेदेनपुनःश्रेयोविशेषकृत ॥ १ ॥ गृहस्थस्यमुक्तोपायमाह ॥ गृहस्थइति
श्रमंतुनस्यपति ॥ धर्मेषुभिहितेषुनहिगृहस्थस्यसमोक्षोनस्यादितिशंकितविज्ञः ॥ गृहस्थइति
२ नस्मासातथमीनाह गृहेष्वित्यादियावदध्यायसमाप्ति साक्षाद्वासुदेवार्पणंयथाभवतितथाकुर्वं
त्रुपासीत ॥ २ ॥ स्वयमेवमुच्यमानेषुविमुच्यमानेषुयथाउत्थितःपुमान्स्वप्नदृष्टपुत्रादिषुसंगंविमुं

नन्वेवंभूतस्य दुर्जनैरभिभूयमानस्य कुतो गृहे स्थितिः ॥ क्रियाः स्युः तत्राह ॥ यावदर्थमिति ॥ अन्तरं नासक्तः
बहिस्त्वासक्त इव नृलोके जनमध्ये नरतां मनुष्यत्वं न्यसेत् ॥ पुरुषकारमाविष्कुर्यात् इत्यर्थः ॥ ५ ॥ अथ यदेतत्
कापि न कुर्यादित्याह ज्ञातय इति ॥ ६ ॥ नन्वेवं सर्वानुमोदने वित्तव्ययप्रसंगात् अन्नजीवनं कुतो वा कर्म
कारणं तत्राह ॥ दिव्यं वृष्ट्यादिभिर्जातं तथान्यादि भौमं निधानादि अन्तरिक्षमकस्मादेव प्राप्तं एवं स्वत एव
अच्युतनिर्मितं दैवलब्धं एतत् पूर्वोक्तं कर्मादि ॥ ७ ॥ दैवाद्वित्तलाभे ज्ञातेऽपि न तत्राभिमानो न्यकार्य इत्याह
यावदिति म्रियेत पूर्येत ॥ ८ ॥ अत एव यत्कमपि स्वगृहे तेज्ञेवा प्रविश्य भुञ्जानं न निवारयेदित्याह मृगोष्ट्रेति

यावदर्थमुपासीनो देहे गेहे च पण्डितः ॥ विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत् ॥ ५ ॥ ज्ञातयः पि
तरौ पुत्रा भ्रातरः सुहृदोऽपरे ॥ यद्वदन्ति यदिच्छन्ति चानुमोदेत निर्ममः ॥ ६ ॥ दिव्यं भौमं चान्तरि
क्षं वित्तमच्युतनिर्मितं ॥ तत्सर्वमुपभुञ्जान एतत्कुर्यात्स्वतो बुधः ॥ ७ ॥ यावद्भ्रियेत जठरं ताव
त्स्वत्वं हि देहिनां ॥ अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥ ८ ॥ मृगोष्ट्रखरमर्काखुसरीसृप्ख
गमक्षिकाः ॥ आत्मनः पुत्रवत्पश्येत्तैरेषामन्तरं कियत् ॥ ९ ॥ त्रिवर्गं नातिकृच्छ्रेण भजेत गृह
मेध्यपि ॥ यथादेशं यथाकालं यावद्दैवोपपादितं ॥ १० ॥ आश्वाघान्तेवसायिभ्यः कामान्सं
विभजेद्यथा ॥ अप्येकामात्मनो दारां नृणां स्वत्वग्रहो यतः ॥ ११ ॥

मर्को मर्कटः सरीसृपः सर्पः ॥ मक्षिकाश्चैतैः पुत्रैः एषां मृगादीनां ॥ ९ ॥ अतिकृच्छ्रेण पापेन न भजेत् ॥ किंच
यावद्दैवप्रापितं तावदेव भजेत् ॥ १० ॥ आश्वाघा आश्वपतिताः अन्तेवसायिनः चण्डालादयः ॥ तान् अभिव्या
प्य यथायथार्हं कामान् संविभजेत् ॥ स्वभोगान् विभज्य दद्यात् यद्यप्येकैवात्मनो दारा भार्या तस्यामति
थिशुश्रूषणे नियुक्तायां स्वस्य शुश्रूषा हीयेत यस्मात् नृणां स्वत्वग्रहः ॥ ममैवेयमित्याग्रहः ॥ तामेकाम
पि संविभजेत् ॥ अतिथ्यादिशुश्रूषणे नियुञ्जीतेत्यर्थः ॥ नन्वन्यथा मत्तः यथार्हं संविभजेदित्युक्तं तत्राह ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री. भा. गु. स. टी. ९०

पूर्वं देहेनैव स्वीकृतः स्यादित्याह॥ यदर्थे यन्निमित्तं अन्यैरजितोपीश्वरस्तेन जित एव॥२॥ कथमेवं त
स्यास्तत्राभिमानो हातुं शक्यः सम्यग्विचारेणेत्याह॥ कृमिविड्भस्मसु निष्ठा पर्यवसानमंतो यस्य तदीया दे
हाद्या रतिर्यस्यां सा स्वमहिम्ना नभोपि छादयतीति नभश्छदिः॥३॥ किंच सिद्धैर्दैवलब्धैः यज्ञावशिष्टार्थैः पं
चयज्ञशेषैरन्नादिभिः॥ महतां निवृत्तानां॥४॥ एतदेव प्रपंचयन्नाह॥ देवादीन्पंचयज्ञदेवताः॥ आत्मानं च एवं

जह्याद्यदर्थे स्वान्प्राणान्हन्याद्वा पितरं गुरुं॥ तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः॥२॥
कृमिविड्भस्मनिष्ठांतं क्वेदं तुच्छं कलेवरं॥ क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः॥३॥
सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः॥ शेषे स्वत्वं त्यजन्प्राज्ञः पदवीं महतामियात्॥४॥
देवानृषीन्नृभूतानि पितॄनात्मानमन्वहं॥ स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक्॥५॥ यर्ह्या
त्मनोधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः॥ वैतानिकेन विधिना अग्निहोत्रादिना यजेत्॥६॥ नह्य
ग्निमुखतोयं वै भगवान्सर्वयज्ञभुक्॥ इज्येत हविषा राजन्यथा विप्रमुखे हुतैः॥७॥ तस्मा
द्ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः॥ तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु॥८॥

पृथक् पुरुषं अंतर्यामिणमेव यजेत॥५॥ ननु पुनरप्यतिनिर्बंधो यज्ञार्थं कार्य इत्याह॥ नहीति विप्रमु
खे हुतैरन्नादिभिर्यथा इज्येत इज्येत न तथा अग्निमुखतो हविषा इज्येत॥७॥ ब्राह्मणेषु देवेषु पंचयज्ञदे
वतासु मर्त्यादिषु अन्येषु नरेषु पश्वादिषु च वर्तमानं क्षेत्रज्ञमंतर्यामिणं ब्राह्मणाननु मर्त्यादियजने ब्राह्मणा
यजनानंतरं॥ अन्येषु यजस्व पात्रांतरे ब्राह्मणप्राधान्येनेत्यर्थः॥८॥

राम. ९०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रोष्ठपदेभाद्रपदे ।।१९।।२०।। शुक्लपक्षेअस्तयस्तृतीयायामित्यर्थः ।। हेमंतेशिशिरेचमार्गशीर्षादिमासचतुष्
येपियाःतिस्रोष्टकास्तास्ताः ।।२१।। संपूर्णचंद्रापौर्णमासीराकान्यूनचंद्रहीसैवानुमति ।। तस्यामासर्क्षाणिनक्षत्राणि
सनामप्रवृत्तिनिमित्तानिनक्षत्राणियुतानियदास्युः ।। तदाततुक्तंकार्तिकायांकृत्तिकायुक्तापौर्णमासीपौषीमासे
तुयत्रसानान्मासपौषोमाघाख्याष्टकैवमेकादशापरइति ।।२२।। अनुराधाश्रवणउत्तरफाल्गुनीउत्तराषाढाउत्त

ऊर्ध्वंदापरपक्षीयंमासिप्रोष्ठपदेद्विजः ।। श्राद्धंपित्रोर्यथावित्तंतदप्यूनांचवित्तवान् ।।१९।। अयनेवि
षुवेऊर्ध्वंयोद्युतीपातेदिनक्षये ।। चंद्रादित्योपरागेचद्वादशीश्रवणेषुच ।।२०।। तृतीयायांशुक्लपक्षे
नवम्यामथकार्तिके ।। चतस्रश्चाप्यष्टकास्युर्हेमंतेशिशिरेतथा ।।२१।। माघेचसितसप्तम्यामघा
राकासमाश्रमे ।। राकयाचानुमत्यावामासर्क्षाणियुतान्यपि ।।२२।। द्वादश्यामनुराधास्यात्श्रव
णःतिस्रउत्तराः ।। तिस्रश्चैकादशीवाथजन्मर्क्षश्रोणयोगयुक् ।।२३।। नपुनेश्रेयसाकालान्दणश्रे
याविवर्द्धनाः ।। ऊर्ध्वंयान्सर्वात्मनेनेषुश्रेयोमोघंनदाप्नुयाः ।।२४।। पञ्चस्वानंजपोहोमोव्रतंदेवद्वि
जार्चनं ।। पितृदेवनरभूतेभ्योयद्दत्तंतदनश्वरं ।।२५।। ।।

राभाद्रपदाद्वादश्यांयदास्यात् ।। आसृत्रासप्तकादशीवायदास्यात् ।। तदाचजन्मर्क्षश्रोणयोगयुक्
जन्मनक्षत्रस्यश्रवणस्यवायोगेनयुक्तेदिनं यदायोगग्रहणेसर्वेयथाकल्पार्थाः ।।२३।। नकेवलंश्राद्धस्यैवे
नेकालाः ।। किंतर्हिसमाजस्यस्याद्ध ।। तपनरनिद्धाभ्यांनदेवश्राप्नुषः ।। अमोघंसाफल्यमित्यर्थः ।।२४।। ।।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भा॰ ग॰ म॰ टी॰ ५९

संस्कारकालइति जायायां पुंसवनादिः॥ अपत्यस्यजातकर्मादिः आत्मनोयज्ञदीक्षादिः प्रेतस्यसंस्थादह
नादिस्तेनाहस्तु सांवत्सरिकंयदाअन्यस्मिन्नपि अभ्युदयार्थकर्माणिश्रेयःकुर्याद्दिनंत्वन्तुषंगः॥२९॥ यत्रयु
स्मिन्सर्वमेतच्चराचरमस्तितत्स्यभगवतोबिंबरूपंसत्यासंयत्रलभ्यतेसवैपुण्यतमोदेशः॥२॥ अद्देहतमेः
राश्रितानि॥२८॥२९॥ सीतायारामस्यवाश्रमआदियेषांहृयोःपृथक॥ग्रहणंवियोगकालाभिप्रायेण॥२९॥

संस्कारकालोजायायाअपत्यस्यात्मनस्तथा॥प्रेतसंस्थामृताहश्चकर्मण्यभ्युदयेनृप॥२९॥अ
थदेशान्प्रवक्ष्यामिधर्मादिश्रेयआवहान्॥सवैपुण्यतमोदेशःसत्पात्रंयत्रलभ्यते॥बिंबंभगवतो
यत्रसर्वमेतच्चराचरं॥२७॥यत्रहब्राह्मणकुलंतपोविद्यादयान्वितं॥यत्रयत्रहरेरर्चासदेशःश्रेयः
सांपदं॥२८॥यत्रगंगादयोनद्यःपुराणेषुचविश्रुताः॥सरांसिपुष्करादीनिक्षेत्राण्यर्हाश्रितान्युत
कुरुक्षेत्रंगयशिरःप्रयागःपुलहाश्रमः॥नैमिषंफाल्गुनंसेतुःप्रभासोथकुशस्थली॥३०॥वाराण
सीमधुपुरीपंपाबिंदुसरस्तथा॥नारायणाश्रमोनन्दासीतारामाश्रमादयः॥३१॥सर्वेकुलाचला
राजन्महेन्द्रमलयादयः॥एतेपुण्यतमादेशाहरेरर्चाश्रिताश्चये॥३२॥एतान्देशान्निषेवेतश्रे
यस्कामोह्यभीक्ष्णशः॥धर्मोह्यत्रेहितःपुंसांसहस्राधिफलोदयः॥३३॥पात्रंत्वत्रनिरुक्तंवैक
विभिःपात्रवित्तमैः॥हरिरेवैकउर्वीशयन्मयंवैचराचरं॥३४॥देवर्ष्यर्हत्सुवैसत्सुतत्रब्रह्मात्म
जादिषु॥राजन्यदग्रपूजायांमतःपात्रतयाच्युतः॥३५॥

सर्वेआश्रिताश्चस्थिरप्रतिमाश्रिताः पूर्वंतुसालग्रामशिलायर्चनदेशाउक्ता इत्यपौनरुक्त्यं॥३२॥अत्रएषुदे
शेषुदेहिनःकृतःसहस्रगुणमधिकस्यफलस्यउदयोयस्मात्तथाहरिरेवपात्रंनिर्णीतंनन्दादिः हरिरेवेति
देवेषुचऋषिषुचअर्हत्सुचतपोयोगादिसिद्धेषुब्रह्मात्मजादिषुसनकादिषपिसत्सुतत्रत्वदीयेराज
सूयेयद्यस्मादच्युतएवपात्रतयासंमतः॥३५॥ ९२

रास॰
५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

समंतत्वे हेतुमाह जीवराशिभिर्योसौ ब्रह्मांडकोशएव योंघ्रिपः सर्वजीवानामात्मनश्च तर्पणं ३९ एत
देव पुरुषनामनिरुक्त्या द्रढयति पुराणीति नृतिर्यगादिरूपाणि पुराणि शरीराणि तेषु जीवरूपेण स्व
स्वांशेन वसन्तः शेते अतः पुरुष इति प्रसिद्धः ४० तारतम्येन तिर्यगादिभ्यः पुरुषश्चास्मादाधिक्येन वर्त
ते तस्मात्पुरुषः पात्रं तत्रापि यावानात्मा ज्ञानांशः यथा ईयते तपआदियोगेन यत्र यत्र प्रतीयते तथा तथा
सौ पात्रमित्यर्थः तथा च श्रुतिः पुरुषत्वेवाविस्तरमात्मेत्यादि ४१ तर्हि प्रतिमादौ हरेः पूजा किमिति

जीवराशिभिराकीर्णअंडकोशांघ्रिपो महान् तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणं ३९
पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ४० तेष्वेषु भ
गवान् राजन् तारतम्येन वर्तते तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते ४१ दृष्ट्वा तेषां मि
थो नृणामवज्ञानात्मतां नृप त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ४२ ततोर्चायां ह
रिं केचित्संश्रद्धाय सपर्यया उपासते उपास्तापि नार्थदा पुरुषद्विषां ४३ पुरुषेष्वपि राजेंद्र
सुपात्रं ब्राह्मणं विदुः तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुं ४४ नन्वस्य ब्राह्मणा राजन् कृ
ष्णस्य जगदात्मनः पुनंतः पादरजसा त्रिलोकीं दैवतं महत् ४५ इति श्रीभागवते सप्तमस्कं
धे चतुर्दशोध्यायः १४ ॥

कुर्वंतीत्यत आह दृष्ट्वेति द्वाभ्यां मिथोवज्ञानमवमानं तस्मिन्नात्मा बुद्धिर्येषां तेषां भावं दृष्ट्वा क्रियायै पू
जार्थं ४२ हरिमुपासते उपासितापि चार्चा पुरुषद्वेषिणामर्थदा न भवति पुरुषेषु द्वेषं हित्वा वि
तामतीसापि मंदाधिकारिणां पुरुषार्थप्रदा भवत्येवेत्यर्थः ४३ पुरुषेष्वेवं ज्ञानतपआदिभिश्च पु
नर्विशेषांतरमाह पुरुषेष्वपीति वेदं धत्ते अतः सुपात्रं विदुः ४४ एतदेव कैमुत्यन्यायेन द्रढयति नन्वस्ये
ति ४५ इति श्रीभागवते सप्तमस्कंधे चतुर्दशोध्यायः १४ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भा॰ स्कं॰ ७ ९०

ततः पंचदशे सर्वेतरेणाश्रमनिबंधने॥ सर्वतः संग्रहेणाथ वर्णनं तेषां तु लक्षणं॥ सर्वेषामपि मोक्षं च धर्माणा- ति
मावसंग्रहार्थमध्यायारंभः॥ तत्र श्राद्धगतान् विशेषानाह कर्मनिष्ठा इति स्वाध्यायादिषु परिनिष्ठा इति शे-
षः॥ १॥ कव्यानि पितृउद्दिश्य देयानि देवे च हव्यानि पितृभ्यो देयानि यथाऽहं तानि सर्वज्ञ ज्ञानादिना रतेभ्यः

भा॰ २

नारद उवाच॥ कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठा नृपापरे स्वाध्यायेन्ये प्रवचने ये केचिज्ज्ञानयो-
गयोः॥ १॥ ज्ञाननिष्ठाय देयानि कव्यान्यानंत्यमिच्छता देवे च तदभावे स्यादितरेभ्यो यथार्हतः
॥ २॥ द्वौ देवे पितृकार्ये त्रीनेकैकमुभयत्र वा॥ भोजयेत्सुसमृद्धोपि श्राद्धे कुर्यान्न विस्तरं॥ ३॥ देशकाल
लेव संप्राप्ते मुन्यन्नं हरिदैवतं॥ श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयं॥ ४॥ देशकाला वि-
तश्रद्धा द्रव्यपात्रार्हणानि च॥ सम्यग्भवंति नैतानि विस्तरात्स्वजनार्पणात्॥ ५॥ देवर्षिपितृ-
भूतेभ्य आत्मने स्वजनाय च॥ अन्नं संविभजन्पश्येत्सर्वं तत्पुरुषात्मकं॥ ६॥ न दद्यादामिषं श्रा-
द्धे न चाद्याद्धर्मतत्त्ववित्॥ मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया॥ ७॥ नैतादृशः परो ध-
र्मो नृणां सद्धर्ममिच्छतां॥ न्यासो दंडस्य भूतेषु मनोवाक्कायजस्य यः॥ ८॥

श्रा

न॥ २॥ ३॥ न तु विस्तारः कर्तव्यः यतो विस्तारः येन निषिद्धाः नैते तत्राह स्वजनानामर्पणात्॥ ज्ञात्वा नाचेत्रिमे तेन ता-
स्मित्रादयः॥ कथं वक्ष्यामि इत्येवं श्राद्धाद्धिंसनादिनमर्थः॥ मुन्यन्नं आरण्यव्रीह्यादिहरिदैवतं हरये निवेदि-
तं मतं॥ ५॥ पुरुषात्मकं ईश्वररूपं॥ ६॥ ७॥ दंडस्य न्यासः हिंसायाः त्यागो यः एतादृशो न्यो नास्ति॥ ८॥ ॥

राम॰ ९०

अत एवात्र साधिकारिणो बाह्यानि कर्माणि त्यजंतीत्याह ॥ एके इति ॥ अनीहा निष्कामाः ज्ञानदीपिते आत्मस्फूर्तिमति आत्मसंयमे जुह्वति ॥ मनो नियम्य तदंतरायतनया त्यजंतीत्यर्थः ॥ तदुक्तं सर्वतत्त्वज्ञैः प्रत्यक्स्फूर्तिरसमूर्तिः तत्त्वनिष्ठाविद्यातिके ॥ संलत्स्य संन्यजेत्कर्म त्यजन्विघ्नहतोन्यथेति ॥९॥ मामापषः फवेहन्यादितिभूतः अकरुणः तत्कृतः असुतृप् प्राणतर्पकः ततः किं अतज्ज्ञः आत्मतत्त्वानभिज्ञः ॥ तथा च श्रुतिः ॥ न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंतीति ॥१०॥ प्रस्तुतमनुवर्ण-

एके कर्ममयान्यज्ञान् ज्ञानिनो यज्ञवित्तमाः ॥ आत्मसंयमनेऽनीहा जुह्वति ज्ञानदीपिते ॥९॥ द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति ॥ एष माकरुणो हन्यादतज्ज्ञो ह्यसुतृप् ध्रुवं ॥१०॥ तस्माद्दैवोपपन्नेन मुन्यन्नेनापि धर्मवित् ॥ संतुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकां क्रियाः ॥११॥ विधर्मः परधर्मश्च आभास उपमा छलः ॥ अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत् ॥१२॥ धर्मबाधो विधर्मः स्यात्परधर्मोऽन्यचोदितः ॥ उपधर्मस्तु पाखंडो दंभो वा शब्दभिच्छलः ॥१३॥ यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात्पृथक् ॥ स्वभावविहितो धर्मः कस्य नेष्टः प्रशांतये ॥१४॥ ॥

यति तस्मादिति ॥११॥ अधर्मवत् साक्षान्निषिद्धवत् ॥१२॥ क्रममनादृत्य पंचापि व्याचष्टे धर्मबाधः ॥ धर्मं तु आपि यस्मिन् क्रियमाणे स्वधर्मबाधः ॥ अन्यस्य चोदितोऽन्यस्य परधर्मः उपमेति व्याचष्टे इति पाठे धर्मस्त्विति शब्दस्य भित् भेदः ॥ अन्यथा व्याख्यानं यस्मिन् ॥ यथा दश वा भोजयेदित्युक्ते दशभ्यो वरानिति शब्दभिदिति पाठे धर्मं एव हि मात्र विभर्तीति यथा गां दद्यादित्याद्युक्ते मसिखंडत्यागो दानं ॥१३॥ स्वधर्मानुष्ठानानंतरं धर्मं भूयस्त्वाश्रमपि परधर्मो नानुष्ठेयः ॥ अनुपयोगादित्याह ॥ स्वभावविहित इति ॥१४॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंचअधनोयस्मोऽर्थ्यंधनंनेहेतनापेक्षेतनधनार्थ्यंनव्याप्रियेतइतिवा॥ दैवोपपन्नेनैवस्वधर्मसिद्धेरुक्तत्वात्
यात्रार्थमपिनेहेतयेनतत्स्वयंचयति॥ अनीहेतिसार्द्धैःषड्भिः॥१५॥१६॥ उपानद्भ्यांपादयोर्यस्य उपानत्पादस्तस्य ए
गृहपालःश्वानद्वदाचरति॥१७॥१८॥ क्षुत्तृड्भ्यांचजनःकामस्यान्तंयाति॥ अन्नोदकाभ्यांनिवृत्तकामान्तरा
भावात्॥ क्रोधस्यचान्तंयाति॥ एतस्यक्रोधस्यपरफलेहिंसानस्योदयान्निष्पन्ने॥ दिशोजित्वापिभुवोभु

धर्मार्थमपिनेहेतयात्रार्थंवाधनोधनं॥ अनीहानीहमानस्यमहाहेरिववृत्तिदा॥१५॥ संतुष्टस्य
निरीहस्यस्वात्मारामस्ययत्सुखं॥ कुतस्तत्कामलोभेनधावतोऽर्थेहयादिशः॥१६॥ सदासंतुष्ट
मनसःसर्वाःशिवमयादिशः॥ शर्कराकंटकादिभ्योयथोपानत्पदःशिवं॥१७॥ संतुष्टःकेनवा
राजन्नवर्तेतापिवारिणा॥ औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायतेजनः॥१८॥ असंतुष्टस्यविप्रस्य
तेजोविद्यातपोयशः॥ स्रवंतींद्रियलौल्येनज्ञानंचैवावकीर्यते॥१९॥ कामस्यांतंचक्षुत्तृड्भ्यां
क्रोधस्यैतत्फलोदयात्॥ जनोयातिनलोभस्यजित्वाभुक्त्वादिशोभुवः॥२०॥ पंडिताबहवोरा
जन्बहुज्ञाःसंशयच्छिदः॥ सदसस्पतयोऽप्येकेअसंतोषात्पतंत्यधः॥२१॥ असंकल्पाज्जयेत्का
मंक्रोधंकामविवर्जनात्॥ अर्थानर्थेक्षयालोभंभयंतत्त्वावमर्शनात्॥२२॥ आन्वीक्षिक्या
शोकमोहौदंभंमहदुपासया॥ योगांतरायान्मौनेनहिंसांकायाद्यनीहया॥२३॥॥

क्वापिलोभस्यनैवान्तंयातीत्यर्थः॥२०॥२१॥ इदानींकामादिजयोपायानाह॥ असंकल्पादितिचतुर्भिः।
जयेदितिनयथापेक्षमन्वेति॥ अर्थेनर्थदर्शनेनतत्त्वावमर्शनात्॥ अद्वैतानुसंधानेन॥२२॥ आन्वीक्षिक्या
आत्मानात्मविवेकेनमहतांसात्विकानांसेवया योगस्यान्तरायान् लोकवार्त्तादीन्॥२३॥॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

येभ्यो भूतेभ्यो भयं जातं तेन तेष्वेव कृपया हिताचरणेन दैवं दैवोपसर्गनिमित्तं दुःख्या मनःपीडादि । तदुक्तं याज्ञव-
ल्क्येन । विमना विफलारंभः संसीदत्यनिमित्ततः इति ॥ आत्मजं देहजं योगवीर्येण प्राणायामादिबलेन सत्त्व-
निषेवया सात्त्विकाहारादिना ॥२४॥ ननु कथं गुरौ भक्त्या सर्वस्य जयः स्यात् तस्यापि मनुष्यत्वेन तद्वस्थत्वात्
तत्राह यस्येति । मर्त्यासद्धीः मनुष्य इति दुर्बुद्धिः । तस्य शास्त्रश्रवणं कुंजरस्नानवद्व्यर्थं ॥२६॥ ननु गुरोरपि पु-
त्रादयः तेन नरमेवमन्यंते अत आह एष गुरुः साक्षाद्भगवानेव लोकस्य नरोऽसाविति बुद्धिर्भ्रांतिरित्यर्थः ॥ य

कृपया भूतजं दुःखं दैवं जह्यात्समाधिना । आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया ॥२४॥ रजस्त-
मश्च सत्त्वेन सत्त्वं चोपशमेन च । एतत्सर्वं गुरौ भक्त्या पुरुषो ह्यंजसा जयेत् ॥२५॥ यस्य साक्षाद्भग-
वति ज्ञानदीपप्रदे गुरौ । मर्त्यासद्धीः श्रुतं तस्य सर्वं कुंजरशौचवत् ॥२६॥ एष वै भगवान्साक्षात्प्र-
धानपुरुषेश्वरः । योगेश्वरैर्विमृग्यांघ्रिर्लोको यं मन्यते नरं ॥२७॥ षड्वर्गसंयमैकांताः सर्वा नियम-
चोदनाः । तदंता यदि नो योगानावहेयुः श्रमावहाः ॥२८॥

ज्ञानादिनस्तु ज्ञातेर्मनुष्यबुद्ध्या प्रतीयमानोपि गुरुर्भगवानेव भवेत् । यद्वैष श्रीकृष्ण इत्यर्थः ॥२७॥ एवं सर्वै-
रुपायैः कामादिवेगं जित्वा नियतेंद्रियो भूत्वा ध्यानपरो भवेत् ॥ अन्यथा न प्रति सर्वशास्त्रवैफल्यं स्यादित्या-
ह । षड्वर्गेति सर्वा अपि नियमचोदना इष्टापूर्तादिविधयः ॥ षडिंद्रियवर्गस्य यः संयमः । तस्मिन्नेवैकस्मिन्नं-
तो यासां तदेकांता इत्यर्थः ॥ न तावतापि चरितार्था इत्याह । तदंताः संत्योपि यदि योगान् धारणाध्यानं-
समाधीन् नो आवहेयुः ॥ न साधयेयुः ॥ तर्हि केवलं श्रमावहा एवेत्यर्थः ॥२८॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा ग
स टी
९२

एतदेव दृष्टान्तेनाह ॥ यथावार्त्तादयः कृष्यादयअर्थाः ॥ तत्फलानि च योगस्यार्थं मोक्षं न साधयंति प्रत्युतान
र्थाय संसारायैव अप्रसन्नो बहिर्मुखस्येष्टापूर्त्तादयपि तथा ॥ २८ ॥ एवं योगं युंजतोपि यस्य पुत्रकुटुंबादिसंगेन चित्तं
विक्षिप्यते ॥ तस्य क्रममाह ॥ यश्चित्तस्य विजये यत्त उद्युक्तः स भिक्षुः स्यात् ॥ संन्यसेत् ॥ तथाचश्रुतिः ॥ इंद्रा
हूनस्य गार्हस्थ्ये ध्यानभंगादिकारणं ॥ लब्धयित्वा गृहाद्दीक्षां संन्यसेद् विचारयन्निति भिक्षया शास्त्रमितम

यथावार्त्तादयो ह्यर्था योगस्यार्थं न बिभ्रति ॥ अनर्थाय भवेयुस्ते पूर्त्तमिष्टं तथासतः ॥ २८ ॥ यश्चित्त
विजये यत्तः स्यान्निःसंगोपरिग्रहः ॥ एको विविक्तशरणो भिक्षुर्भैक्ष्यमिताशनः ॥ २९ ॥ देशे शुचौ
समे राजन् संस्थाप्यासनमात्मनः ॥ स्थिरं समं सुखं तस्मिन्नासीतर्ज्वंग ओमिति ॥ ३० ॥ प्राणापानौ सं
निरुंध्यात्पूरकुंभकरेचकैः ॥ यावन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः ॥ ३१ ॥ यतो यतो निःसर
ति मनः कामहतं भ्रमत् ॥ ततस्तत उपाहृत्य हृदि रुंध्याच्छनैर्बुधः ॥ ३२ ॥ एवमभ्यसतः चित्तं का
लेनाल्पीयसा यतेः ॥ अनिशं तस्य निर्वाणं यात्यनिंधनवह्निवत् ॥ ३३ ॥ कामादिभिरनाविद्धं प्रशा
न्ताखिलवृत्तियत् ॥ चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥ ३४ ॥ यः प्रव्रज्य गृहात्पूर्वं त्रिव
र्गावपनात्पुनः ॥ यदि सेवेत तान्भिक्षुः स वै वान्ताश्यपत्रपः ॥ ३५ ॥

प्राणेयमम् ॥ ३० ॥ स्वनासाग्रे समं मंगं यस्य स सत्त्वं यथा भवत्येवमासीनः ओमिति स्वच्छव्यारयन्निति शेषः ॥ ३१ ॥ ३२ ॥ ए
वमनिशमभ्यसतस्तस्य यतेश्चित्तं निर्वाणं शान्तिं याति ॥ ३३ ॥ न च पुनर्विक्षिप्यते इत्याह कामादिभिरनाविद्धं य
च्चित्तं नोत्तिष्ठेत ॥ एतः प्रशान्ताखिलाहृत्रयो यस्मात् ब्रह्मसुखेन स्पृष्टं ॥ ३४ ॥ यस्तु प्रव्रज्या कृत्वापि भोग
मभिलिप्सुः स्यात् ॥ तं निंदति यस्तु इति त्रयाणां धर्मादीनां वर्गः ॥ आसमंतादुप्यते यस्मिंस्तस्मात् गृहान्तानान्य
मादीन् वान्ताशी छर्दितभोजी निर्लज्जश्च सः ॥ ३५ ॥

श्रम
९२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नवेदयुरितिं द्विषुत्वादित्याह ॥ यैः पूर्वं स्वदेहः अनात्मादिरूपः सम्यक्तः विविंचितः । तएव पुनरनेनमात्मेति मत्वा आच्छ्यंति स्नापयंति ॥ ४९ ॥ यतिरुपलक्षणीकृत्य अन्यानपि स्वधर्मत्यागिनो निंदति गृहस्थस्येति द्वाभ्यां ५०
५१ नत्वात्मनव तस्य भिक्षोरिंद्रियलौल्ये पिकोदोषस्तत्राह आत्मानं परं ब्रह्म चेत् जानीयात् ज्ञानेन धुताः निरस्ता आशायावासनायस्य तस्य ज्ञानिनो लौल्यमेव न संभवतीत्यर्थः । तथा च श्रुतिः ॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति ॥ ५१ ॥ अतस्य तल्लौल्येन नरकपातापत्तेरप्रमत्तेन सदातत्वज्ञाने यतितव्यमिममर्थं आत्मानं रथिनं विद्धि शरीरं रथमेव चेत्यादि श्रुत्युक्तरथरूपक

यैः स्वदेहः स्मृतो नात्मा मर्त्यो विट्कृमिभस्मसात् । तमेनमात्मसात्कृत्वा श्लाघयंति ह्यसत्तमाः ॥
गृहस्थस्य क्रियात्यागो व्रतत्यागो वटोरपि । तपस्विनो ग्रामसेवा भिक्षोरिंद्रियलौल्यता ॥ ५० ॥ आ
श्रमापसदा ह्येते खल्वाश्रमविडंबकाः । देवमायाविमूढांस्तानुपेक्षेतानुकंपया ॥ ५१ ॥ आत्मा
नं चेद्विजानीयात्परं ज्ञानधुताशयाः । किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति लंपटः ॥ ५१ ॥ आहुः
शरीरं रथमिंद्रियाणि हयानभीषून्मन इंद्रियेशं । वर्त्मानि मात्रा धिषणां च सूतं सत्वं बृहद्बंधुर
मीशसृष्टं ॥ ५१ ॥ अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवं । धनुर्हि तस्य प्रणवं पठं
ति शरं तु जीवं परमेव लक्ष्यं ॥ ५२ ॥ ॥

द्वारेण आह ॥ आहुरिति षड्भिः ॥ इंद्रियेशं मनो अभीषून् रश्मीन् आहुः मात्राः शब्दादीन् वर्त्मानि गंतव्यदेशान् आहुः सत्वं चित्तं बृहद्देहव्यापि बंधुरं बंधनं चित्तं विना ह्यनिबद्धमिव शरीरं भवति ॥ ईशसृष्टमिति बंधनकर्ता त्वीश्वर इत्यर्थः ॥ ५१ ॥ प्राणादयः पंचनागः कूर्मश्च कृकरो देवदत्तो धनंजयः ॥ चेत्येवं दशविधप्राणमक्षमभिमानं साहंकारं जीवं रथिनं प्रणवं जीवं शरं परं ब्रह्म लक्ष्यं यद्यथा धनुषा शरो लक्ष्ये निपात्यते तेन तथा प्रणवेन जीवो ब्रह्मणि निपात्यत इत्यर्थः ॥ ५२ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा. सटी. ९२

रागादयो जेतव्याः शत्रवः तत्र रजोभिनिवेशः क्वचिदारूढसमाधेः सत्वप्रकृतयोपि परोपकारादिप्रवृत्तयः
शत्रवः ॥ ४४ ॥ नृकायरूपरथमात्मवशः ॥ उपकल्प्यः इंद्रियादिपरिकरो यस्मिन् न यावद्भूतं यावद्देहं तावदेव गु
रुपादार्चनया निशितं ज्ञानखड्गं बिभ्रत् अच्युताश्रयः सन्निरस्तशत्रुः उपशान्तः स्वानंदेन तुष्टो
भूत्वा इदं रथादिकमपि त्यजेत् इत्यर्थः ॥ ४५ ॥ अच्युताश्रयाभावे बाधकमाह नोचेदिति । असंतो बहिर्मुखा ये इं
द्रियवाजिनः सूतः बुद्धिः तेऽत्यर्थं प्रवृत्तिमार्गं नीत्वा विषयास्त एव दस्यवः तेषु निक्षिपन्ति पतिं रथिनमित्यर्थः । सूतेन च वर्तमानं तं

रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ॥ मानोवमानोऽसूया च माया हिंसा च मत्सरः ॥ ४३ ॥ रजः प्रमा
दः क्षुन्निद्रा शत्रवस्त्वेवमादयः ॥ रजस्तमःप्रकृतयः सत्त्वप्रकृतयः क्वचित् ॥ ४४ ॥ यावन्नृकायरथ
मात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातं ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वानन्द
तुष्ट उपशान्त इदं विजह्यात् ॥ ४५ ॥ नोचेत्प्रमत्तमसदिंद्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु
निक्षिपंति ॥ ते दस्यवः सहयसूतममुं तमोन्धे संसारकूप उरुमृत्युभये क्षिपंति ॥ ४६ ॥ प्रवृत्तं च निवृत्तं च
द्विविधं कर्म वैदिकं ॥ आवर्तते प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतं ॥ ४७ ॥ हिंस्रं द्रव्यमयं काम्यमग्निहोत्रा
द्यशान्तिदं ॥ दर्शश्च पूर्णमासश्च चातुर्मास्यं पशुः सुतः ॥ ४८ ॥ एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमे
व च पूर्तं सुरालयारामकूपाजीव्यादिलक्षणं ॥ ४९ ॥

मोऽन्धेनास्मिन्नाम्ने उरुमृत्युभयं यस्मिन् ॥ ४६ ॥ ननु च वेदविहितेऽर्थे नोदितकारिणः पुंसः कथमेवमनर्थ
प्राप्तिः स्यादित्याशंक्य वेदोक्तकर्मणां द्वैविध्यं दर्शयन् फलभेदमाह प्रवृत्तं चेति द्वाभ्यां ॥ ४७ ॥ हिंस्रं श्येना
दिकर्म अशान्तिदं अनाप्तसमृद्धिकं अग्निहोत्रादि शब्दार्थं विवरणं दर्शश्चेति पशुः पशुयागः सुतः सोमयागः ॥ ४८
हुतं वैश्वदेवं प्रहुतं बलिहरणं तत्सर्वमिष्टमुच्यते एतदेव वैदिकं काम्यमशान्तिदं च नहि प्रवृत्ताख्यमपीत्य
र्थः आजीव्यं प्रपादि ॥ ४९ ॥

५२

रामः ९२

प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह । द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणा
मो देहान्तरारंभकः । येन संपरिष्वक्तो गच्छति । य एव श्रुतावप्शब्देनोक्त इति तु पंचम्यामाहुतावापः पुरु
षवचसो भवंतीति पाठान्तरे द्रव्यशब्देन तन्मात्रशब्दोक्तानींद्रियाणि उक्तविपाकशब्देन हृदयाग्रप्र
द्योतः । तथा चश्रुतिः । स इमास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति । तथा तस्य हैत
स्य हृदयस्याग्रं प्रद्योतते तेनैष आत्मा निष्क्रामतीति धूमादिशब्दैः । तत्तदभिमानिन्यो देवताः । तत्राप
क्षयः कृष्णपक्षः सोमः सोमलोकः । तत्र भुक्तभोगस्यावरोहणप्रकारमाह । दर्श इत्यादि दर्शयति विप
रीतलक्षणयाऽतिविशिष्टभोगात्ययशोकाग्निना देहलयेनादर्शनमुच्यते । एतदुक्तं भगवति भूतसूक्ष्म

द्रव्यसूक्ष्मविपाकश्च धूमो रात्रिरपक्षयः ॥ अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ॥ अन्नं रेत
इति क्ष्मेश पितृयानं पुनर्भवः ॥५०॥ एकैकश्येनानुपूर्वं भूत्वा भूत्वेह जायते ॥ निषेकादि श्म
शानान्तैः संस्कारैः संस्कृतो द्विजः ॥५१॥ इंद्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति ॥५२॥

ततो भूमावायाति वार्षिकदेवताभिः सोमलोकं प्रापितः । तद्भोगावसाने विलीनदेहो वृष्टिद्वारेणौषधि
वीरुधादिसाम्यापत्तिक्रमेण जायते ॥५०॥ एवं पुनर्भवहेतुः । पितृयानं प्रवृत्तकर्ममार्ग इति क्ष्मेश हे भू
पते । पुनर्भवमेवाह । एकैकश्येनेति एकैकक्रमेण भूत्वा तत्तत्साम्यं प्राप्येह भूमौ जायते । तत्राधिका
रित्वमाह । निषेकादीनि अन्त्येष्ट्यादि कार्याण्येवं जन्मनि लभत इत्यर्थः ॥५१॥ निवृत्तकर्मनिष्ठस्योपा
सनाविशेषमुपदिशन्नर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमाह । इंद्रियेष्वित्यादिना यज्ञाद्व्ययज्ञेषु हिंसा
याऽचीरत्वादिति मुख्यनिवृत्तकर्मैव दर्शयन्नाह । ज्ञानेन दीप्यन्त इति । तथा तेषु इंद्रियव्यापाराणामिष्ट
स्तनादीनामिंद्रियतावन्मात्रतां भावयन्तीत्यर्थः । एवमुत्तरत्रापि ॥५२॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० गी० म० टी० ५४

ॐ मौ दर्शनादिसंकल्पनरूपे मनसि विवेकास्तिक्यं विकम्पयुक्तं मनो वा विविध्यादिलक्षणया वाचा हि मनः कार्य
त्वादिविकारं भजति वर्णानां समाम्नाये तद्धि शेषत्वाद्वाचः ॥ स्वरेषु अकारादिस्वरत्रयात्मके ॐकारे बिंदौ नव
प्राणेष्वात्मनि महति बुद्धौ ॥ ५४ ॥ अग्निरिति तत्तदभिमानिन्यो देवताः प्रापणीति पूर्ववत् दिवाह्नः प्राहुः
तस्यैवांशाः शुक्लपक्ष उत्तरायणं यद्वा प्राकाशात्कालिच प्रमाणं तत्समं तदुत्तरमयनं संवत्सरं ब्रह्मलोकं ब्रह्मलो
कं गतस्य भोगावसाने मोक्षप्रकारमाह ॥ विश्वमिति विश्वः स्थूलोपाधिः ॥ तस्य स्थूलस्य सूक्ष्मे विलापनं सूक्ष्मोपाधि
स्तैजसो भवति ॥ सूक्ष्मं च कारणे विलाप्य कारणोपाधिः प्राज्ञो भवति कारणं च सर्वत्र साक्षित्वेनान्वयात्मा

इंद्रियाणि मनस्युपसंहृत्य वाचि विवेकात्मके मनः ॥ वाचं वर्णसमाम्नाये तमोंकारे स्वरे न्यसेत् ॥ ॐकारं बिं
दौ नादे तं तं प्राणे महत्यमुं ॥ ५३ ॥ अग्निः सूर्यो दिवा प्राह्णः शुक्लो राको त्तरं स्वराट् ॥ विश्वस्तैजसः
प्राज्ञस्तुर्य आत्मा समन्वयात् ॥ ५४ ॥ देवयानमिदं प्राहुर्भूत्वा भूत्वानुपूर्वशः ॥ आत्मयाज्युपशांत
तात्मा ह्यात्मस्थो न निवर्तते ॥ ५५ ॥ य एते पितृदेवानामयने वेदनिर्मिते ॥ शास्त्रेण चक्षुषा वेद जन
स्थोपि न मुह्यति ॥ ५६ ॥ आदावंते जनानां सद्बहिरंतः परावरं ॥ ज्ञानं ज्ञेयं वचो वाच्यं तमो ज्योतिस्त्व
यमं ॥ ५७ ॥

तत्स्वरूपे विलाप्य [illegible] तुर्यो भवति
तेषां च व्यभिचारिणां साक्षित्वेनात्ययेषु तु आत्मा भवति मुच्यत इत्यर्थः ॥ ५५ ॥ मत्र्यो भूत्वा भूत्वा निवर्तते न त
था न निवर्तत इत्यर्थः ॥ ५६ ॥ वेदेन निर्मिते धूमं वृतिं संभवतीत्यादिनाने अर्चिरभिसंभवतीत्यादिना च निरूप
येन विविच्य ज्ञापिते इत्यर्थः ॥ जनस्थोपि देहस्थोपि न मुह्यति ॥ ५६ ॥ तत्र हेतुमाह ॥ आदाविति ॥ जनानां देहा
दीनां आदौ कारणत्वेन अंते चावधित्वेन यत्सत्तत्स्याद्बहिर्भोग्यं अंतर्भोक्तृ परमव[illegible]रं च उच्चं नीचं तमो
ऽप्रकाशः ॥ तत्सर्वमयं तत्तानीयत्स्वयमेव न तस्माद्व्यतिरिक्तं वस्तु किंचिदस्तीत्येन मुह्येदित्यर्थः ॥ ५७ ॥

राम ५४

ननु तर्हि कथं स्थगार्थः ॥ तस्यापि प्रतीयते तत्राह ॥ आबाधितः ॥ तर्कविरोधेन सर्वतो बाधितोपि ॥ आभासः
प्रतिबिंबादिवस्तुतयाप्यध्यासतः ॥ तद्दैंद्रियकं सर्वमर्थत्वेन विकल्पितं न तु परमार्थतः दुर्घटत्वात्
५५ ॥ तदेवाह द्वित्यादीनां पंचभूतानां छायापेक्षया अवलंबनरूपं देहादिसंस्थानारंभपरिणामानामसः
धेक तमापि न भवति ॥ न तावन्नेषां संख्यानां ॥ हृदादीनामिव वनं पक्वदेशाकर्षणे असर्वाकर्षणानुपपत्तेः ॥
नस्येकस्मिन् हृदे आकृष्टे सर्वेषां नमाकृष्यते ॥ न च विकारस्य आरब्धेवयवी अपि शब्दान्न परिणामोपि कृतः
स किं स्वावयवेभ्यो वा परिणतेभ्यो वा पृथक् ॥ तदन्वितो वा न तावदन्यत् पृथक् तथा अप्रतीतेः न चान्वि

आबाधितोपि ह्याभासो यथावस्तुतयास्मृतः ॥ दुर्घटत्वादैंद्रियकं न तद्दर्थविकल्पितं ॥ ५५ ॥
द्वित्यादीनामिहार्थानां छाया न कतमापि हि ॥ न संख्यानो विकारोपि न पृथक् न्वितोस्य वा ना
धातवोवयवित्वाच्च तन्मात्रावयवैर्विना ॥ न स्युर्ह्यसत्यवयविन्यसन्नवयवी ततः ॥ ५६ ॥

तः स किं प्रत्यवयवं सर्वोपि अन्वेति ॥ अंशेन वा आद्ये अंगुलिमात्रेपि देहबुद्धिः स्यात् ॥ द्वितीये तस्याप्यं
शांशीकारे सत्यनवस्था स्यात् ॥ अतोस्यैवेत्यर्थः ॥ ५५ ॥ एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां द्वित्या
दीनामपि मिथ्यात्वमाह ॥ धातव इति ॥ धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः ॥ अव
यवित्वात्तेषामपि न ह्यवयवः सत्यः ॥ इति चेत्तत्राह ॥ उक्तप्रकारेण अवयविनि असति ॥ अवयवोप्यं
ततोऽसन्नेव स्यात् ॥ अवयविप्रतीत्यन्यथानुपपत्तिं विना तत्सद्भावे प्रमाणाभावादित्यर्थः ॥ तदुक्तं
पंचमस्कंधे ॥ एवं निरुक्ते क्षितिशब्दवृत्तमित्यादि ॥ ५६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
सटी
८५

नत्ववयविनोभावेग्रामासमापायिषुबाल्यादिषुसोयंदेवदत्तइति प्रत्यभिज्ञानंनस्यात्॥तदुक्तंभट्टैः॥ आवि
भावतिरोभावधर्मकेषुनपायियत॥ नत्वहमीतितत्राह स्यादितिवस्तुनः परमात्मनोविकल्पेभेदेग्रसतिय
द्यावस्तुनोविपर्ययाविकल्पेसति॥ पूर्वस्पर्वारोपसादृश्यात् सएवेतिभ्रमः स्यात्॥ सचतावदेवयावदविद्या॰
निवृत्तिः॥ ननुसर्वमिथ्यात्वेशास्त्रस्यविधिनिषेधताकथंतत्राह॥ स्वप्नमध्येजाग्रत् स्वापव्यवस्थायद्वत्॰
ति॥ ६१॥ इदानीमुक्तमेवाद्वैतंभावनात्रयोपदेशेन दृढीकरोतिभावाद्वैतमितिचतुर्भिः वर्जयन्नालोच

स्यात्सादृश्यभ्रमस्तावद्विकल्पेसतिवस्तुनः॥ जाग्रत्स्वापौयथास्वप्नेतथाविधिनिषेधता॥ ६१॥
भावाद्वैतंक्रियाद्वैतंद्रव्याद्वैतंतथात्मनः॥ वर्तयन्स्वानुभूत्येहत्रीन्स्वप्नान्धुनुतेमुनिः॥ ६२॥ का
र्यकारणवस्त्वैक्यमर्शनंपटतन्तुवत्॥ अवस्तुत्वाद्विकल्पस्यभावाद्वैतंतदुच्यते॥ ६३॥ यद्ब्रह्म
णिपरेसाक्षात्सर्वकर्मसमर्पणं॥ मनोवाक्तनुभिःपार्थक्रियाद्वैतंतदुच्यते॥ ६४॥॥

यन् स्वानुभूत्याआत्मनस्तत्त्वानुभावेनत्रीन्जाग्रदादीन्त्रयअवस्थास्त्रयःस्वप्नास्तान्धुनुते॥ यद्वावस्तुभेद
बुद्धिरेकः स्वप्नः ततस्तदर्थिकारभेदबुद्धिर्द्वितीयः ततोमत्कर्मसाधितमेतत्फलंममैवभोग्यमितितृती
यः तान्धुनुतेनिवर्तयति॥ ६२॥ कार्यकारणयोर्वस्त्वैक्यस्यमर्शनंतन्तुरेवनपटइति॥ ६३॥ मनोवाक्तनुभिः
कृतानांकर्मणांसमर्पणेनैः॥ समर्पणमितिवाउद्देश्यफलभेदाद्धिक्रियाभेदहेतुः॥ ईश्वरार्पणेचतदभा
वान्नक्रियाणामद्वैतं॥ ६४॥॥

राम
८५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ले

आत्मनः स्वस्य जायादीनां च स्वार्थस्वकामस्तयोः देहादीनां पंचभूतात्मकत्वेन भोक्तृस्वरूपपरमात्मत्वेनाभेदा
त्तेनार्थकामयोरैक्यदर्शनमित्यर्थः ॥९५॥ उक्तानाश्रमधर्मान् संक्षिप्याह यदिति यद्यस्य येनोपायेन य
तः सकाशात् ॥९६॥ प्रस्तुतमुपसंहरति ॥ एतैरिति तद्भक्तिभाक् तस्य भक्तः ॥९७॥ एतत्स्वस्य सर्वसा
धारणमुक्तं भक्तस्य तु भक्तिरेव सर्वपुरुषार्थहेतुरिति पाण्डवानेव लक्षीकृत्याह ॥ यथा हीति हे नृपदेव न्

आत्मजायासुतादीनामन्येषां सर्वदेहिनां ॥ यत्स्वार्थकामयोरैक्यं ब्रूयाद्दै तं तदुच्यते ॥९५॥ य
द्यस्य वाभिनिषिद्धं स्याद्येन यत्र यतो नृप ॥ स तेनेहेत कार्याणि नरो नान्यैरनापदि ॥९६॥ एतैरन्यै
श्च वेदोक्तैर्वर्त्तमानः स्वकर्मभिः ॥ गृहेऽप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ्नरः ॥९७॥ यथा हि यू
यं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभोः ॥ यत्पादपंकेरुहसेवया भवानहार्षीन्निर्जित
दिग्गजः क्रतून् ॥९८॥ ॥

पैतृदैवैश्च सहायैः दुस्त्यजादितिवा आत्मनः ॥ श्रीकृष्णादेव प्रभोर्हेतोः ॥ अहंभाव आर्षः ॥ उत्कर्षेणोत्तरतेत्य
र्थः यथा यथावत् तमेव भजतेति शेषः ॥ यद्वा यथा आपद्गणादुत्तीर्णास्तथैव यथा च क्रतून् अहार्षीत् ।
तथा श्रीकृष्णादेव नारकात् संसारादप्युत्तरतेत्यर्थः ॥९८॥

श्रीकृष्णसेवामहतामवज्ञया प्रच्यवन्ति तत्कृपया च सिद्ध्यन्तीति दर्शयन्स्वपूर्ववृत्तांतमाह ॥ अहमिति सार्धैः पंचभिः

अहं पुराभवं कश्चिद्गंधर्व उपबर्हणः ॥ नाम्नातीते महाकल्पे गंधर्वाणां सुसंमतः ॥ ६९ ॥ रूपपेशलमा
धुर्यसौगंध्यप्रियदर्शनः ॥ स्त्रीणां प्रियतमो नित्यं मत्तस्त्वपुरलंपटः ॥ ७० ॥ एकदा देवसत्रे तु गंधर्वाप्स
रसां गणाः ॥ उपहूता विश्वसृग्भिर्हरिगाथोपगायने ॥ ७१ ॥ अहं च गायंस्तद्विद्वान्स्त्रीभिः परिवृतो
गतः ॥ ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा ॥ ७२ ॥ याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः ॥
तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनां ॥ ७३ ॥ शुश्रूषयानुषंगेन प्राप्तोहं ब्रह्मपुत्रताम् ॥ ७३
धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः ॥ गृहस्थो येन पदवीमंजसा न्यासिनामियात् ॥ ७४ ॥

नाम्ना उपबर्हणः ॥ ६९ ॥ पेशलं सौकुमार्यं रूपादिभिः प्रियं दर्शनं यस्य ॥ ७० ॥ ७१ ॥ तदा ज्ञानं विद्वान् उन्मत्तः
सन् ॥ गायन्नेवागतः ॥ ७२ ॥ ७३ ॥ ७४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री.
भा. ग.
स. टी.
८९

त्वंवक्तार्थप्रवेति॥दूर्वेणपुनःपूर्वश्लोकानेवपठति॥यूयमिति॥७५॥शेषंस्पष्टं॥८०॥॥॥इतिश्रीभा

यूयंन्नलोकेवतभूरिभाग्गालोकंपुनानामुनयोभियंति॥येषांगृहानावसनीतिसाक्षाद्गूढंपरं
ब्रह्ममनुष्यलिंगं॥७५॥सवाअयंब्रह्ममहद्विमृग्यकैवल्यनिर्वाणसुखानुभूतिः॥प्रियःसुहृ
द्वःखलुमातुलेयआत्माहंणीयोविधिकृद्गुरुश्च॥७६॥नयस्यसाक्षाद्भवपद्मजादिभीरूपंधिया
वस्तुतयोपवर्णितं॥मौनेनभक्त्योपशमेनपूजितःप्रसीदतामेषसमात्वतांपतिः॥७७॥श्रीशुक
उवाच॥इतिदेवर्षिणाप्रोक्तंनिशम्यभरतर्षभः॥पूजयामासससुप्रीतःकृष्णंचप्रेमविह्वलः॥७
कृष्णपार्थावुपामंत्र्यपूजितःप्रययौमुनिः॥श्रुत्वाकृष्णंपरंब्रह्मपार्थःपरमविस्मितः॥७९॥इ
तिदाक्षायणीनांतेपृथग्वंशाःप्रकीर्तिताः॥देवासुरमनुष्याद्यालोकायत्रचराचराः॥८०॥
इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेप्रह्लादानुचरितेयुधिष्ठिरनारदसंवादेपंचदशो
ध्यायः॥१५॥ ॥

वार्थदीपिकायांसप्तमस्कंधेपंचदशोध्यायः॥१५॥समाप्तोयंभागवतेसप्तमस्कंधः॥७॥॥॥राम ॥

राम.
८९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative